"निवृत्ते भरते धीमानत्रे रामस्तपोवनम् ।
प्रपेदे पूजितस्तस्मिन् दण्डकारण्यमीयिवान् ॥")

पूजितव्यः, त्रि, पूजनीयः । पूजधातोः कर्म्मणि तव्यप्रत्ययनिष्पन्नः ॥

पूजिलः, पुं, (पूज्यते इति । पूज+"गुपादिभ्यः कित् ।" उणा० १ । ५७ । इति इलच् । स च कित् ।) देवता । इति संक्षिप्तसारोणादिवृत्तिः ॥ पूज्ये, त्रि । इत्युणादिकोषः ॥

पूज्यः, पुं, (पूजयितुमर्हः । पूज+"अर्हे कृत्यतृचश्च ।" ३ । ३ । १६६ । इति यत् ।) श्वशुरः । पूजनीये, त्रि । तत्पर्य्यायः । प्रतीक्ष्यः २ । इत्यमरः । ३ । ३ । १५० ॥ यथा,—

"अहं हि पूर्व्वो वयसा भवद्भ्य-
स्तेनाभिवादं भवतां न युक्तम् ।
यो विद्यया तपसा जन्मना वा
वृद्धः स पूज्यो भवति द्विजानाम् ॥
अष्टक उवाच ।
अवादीश्चेद्वयसास्मि प्रवृद्ध
इति वैराजाभ्यधिकः कथञ्चित् ।
यो वै विद्वांस्तपसा स वृद्धः
स एव पूज्यो भवति द्विजानाम् ॥"
इति मात्स्ये ३८ अध्यायः ॥

पूण, क संघाते । राशीकरणे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) षष्ठस्वरी । क, पूणयति धान्यं लोकः । राशीकरोतीत्यर्थः । इति दुर्गादासः ॥

पूतं, क्ली, (पूयते स्मेति । पू+कर्म्मणि क्तः ।) अपनीततुषधान्यम् । वछोलान धान इति भाषा ॥ तत्पर्य्यायः । बहुलीकृतम् २ । इत्यमरः । २ । ६ । २३ ॥

पूतः, त्रि, (पू ञ शोधे+क्तः ।) व्रतादिना शुद्धः । तत्पर्य्यायः । पवित्रः २ प्रयतः ३ । इत्यमरः । २ । ७ । ४५ ॥ शुद्धः । यथा,—

"दधिगोमयादि सामान्यं पवित्रं स्वभावपवित्रं वा ।" इति भरतः ॥ तत्पर्य्यायः । पवित्रम् २ । मेध्यम् ३ । इत्यमरः । ३ । १ । ५५ ॥ यथा,—

"चक्षुःपूतं न्यसेत् पादं वस्त्रपूतं जलं पिवेत् ।
सत्यपूतं वदेद्वाक्यं बुद्धिपूतं विचिन्तयेत् ॥"
इति मार्कण्डेयपुराणम् ॥

सत्यम् । इति जटाधरः ॥

पूतः, पुं, (पूयते स्म येनेति । पू+करणे क्तः । यद्वा, पवते स्मेति गत्यर्थेति कर्त्तरि क्तः ।) शङ्खः । श्वेतकुशः । विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

पूतक्रतायी, स्त्री, (पूतक्रतोरिन्द्रस्य स्त्री । पूतक्रतु+"पूतक्रतोरै च ।" ४ । १ । ३६ । इति ङीप् ऐकारादेशश्च ।) इन्द्रपत्नी । शची । इति जटाधरः ॥

पूतक्रतुः, पुं, (पूतः क्रतुर्येन ।) इन्द्रः । इति जटाधरः ॥

पूतगन्धः, पुं, (पूतः पवित्रो गन्धो यस्य ।) वर्ब्बरः । इति राजनिर्घण्टः ॥

पूततृणम्, क्ली, (पूतं पवित्रं तृणमिति नित्यकर्म्मधारयः ।) श्वेतकुशः । इति राजनिर्घण्टः ॥

पूतद्रुः, पुं, (पूतः पवित्रो द्रुः ।) पलाशवृक्षः । इति राजनिर्घण्टः ॥

पूतधान्यं, क्ली, (पूतं धान्यमिति नित्यकर्म्मधारयः ।) तिलः । इति राजनिर्घण्टः ॥

पूतना, स्त्री, (पूतं करोतीति । तत्करोतीति णिच् । ततो बहुलमन्यत्रापीति युच् ।) हरीतकी । इत्यमरः ।२।४।३६॥ सिन्धुदेशजा स्वल्पत्वक् बृहदस्थिहरीतकी लेपने प्रशस्ता । इति राजवल्लभः ॥ (उत्पत्तिस्थानस्वाकृतिश्चास्या यथा,—

"पूतना मगधोद्भवा ।" "पूतना चतुरस्रका ।"
"पूतना चतरङ्गुला——————————।"
इति हारीते कल्पस्थाने प्रथमेऽध्याये ॥)

गन्धमांसी । इति राजनिर्घण्टः ॥ दानवीभेदः । सा वकासुरभगिनी जिघांसया स्तनकालकूटप्रदानात् श्रीकृष्णेन हता । (एतद्वृत्तान्तस्तु हरिवंशे ६२ अध्याये द्रष्टव्यः ॥) रोगभेदः । इति मेदिनी । न, ६३ ॥ स च अहिपूतनानामबालरोगः । तस्य निदानं यथा,—

"पञ्चवर्णो महापद्मो बाले दोषत्रयोद्भवः ।
शङ्खाभ्यां हृदयं यो वा हृदयाद्वा गुदं व्रजेत् ॥
क्षुद्ररोगे च कथिते अजगल्लयहिपूतने ॥"

क्षुद्ररोगोक्तं यथा,—

"शकृन्मूत्रसमायुक्तेऽधौतेऽपाने शिशोर्भवेत् ।
स्विन्ने वा स्नाप्यमाने वा कण्डूरक्तकफोद्भवा ॥
कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते ।
एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम् ॥"
इति माधवकरः ॥ * ॥

(लक्षणान्तरमस्या यथा,—

"सस्ताङ्गः स्वपिति सुखं दिवा न रात्रौ
विड्भिन्नं सृजति च काकतुल्यगन्धिः ।
छर्द्यार्त्तो हृषिततनूरुहः कुमार-
स्तृष्णालुर्भवति च पूतनागृहीतः ॥"

इति सुश्रुतेनोत्तरतन्त्रे सप्तविंशेऽध्याय उक्तम् ॥ चिकित्सास्या यथा,—

"कपोतवङ्कारत्वक्को वरुणः पारिभद्रकः ।
आस्फोता चैव योज्याः स्युर्बालानां परिषेचने ॥
वचा वयस्था गोलोमी हरितालं मनःशिला ।
कुष्ठं सर्ज्जरसश्चैव तैलार्थे वर्ग इष्यते ॥
हितं घृतं तुगाक्षीर्य्यां सिद्धं मधुरकेषु च ।
कुष्ठतालीशखदिरं चन्दनस्यन्दने तथा ॥
देवदारु वचाहिङ्गु कुष्ठं गिरिकदम्बकः ।
एलाहरेणवश्चापि योज्या तद्धूपने सदा ॥
गन्धनाकुलिकुम्भीका सञ्जानी वदरस्य च ।
कर्कटास्थि घृतश्चैव धूपनं सर्षपैः सह ॥
काकादनीं चित्रफलां विम्बीं गुञ्जाञ्च धारयेत् ।
मत्स्यौदनञ्च कुर्व्वीत कृशरां पललन्तथा ॥
शरावसम्पुटे कृत्वा वलिं शून्यगृहे हरेत् ।
उच्छिष्टेनाभिषिक्तेन शिरसि स्नानमिष्यते ॥
पूज्या च पूतना देवी वलिभिः सोपहारकैः ।
मलिनाम्बरसंवीता मलिनारूक्षमूर्द्धजा ॥
शून्यागाराश्रिता देवी दारकं पातु पूतना ।
दुर्द्दर्शना सुदुर्गन्धा कराला मेघकालिका ॥
भिन्नागाराश्रया देवी दारकं पातु पूतना ॥"

इति चोत्तरतन्त्रे द्वात्रिंशत्तमेऽध्याये सुश्रुतेनोक्तम् ॥) बालमातृकाविशेषः । यथा,—

"तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतना नाम मातृका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः ॥ गात्रमुद्वेजयति स्तन्यं न गृह्णाति दृष्टिं बध्नाति क्रन्दति ऊर्द्धं निरीक्षते । वलिन्तस्य प्रवक्ष्यामि येन सम्पद्यते शुभम् । नद्युभयतटमृत्तिकां गृहीत्वा गन्धं ताम्बूलं रक्तपुष्पं रक्तचन्दनं रक्तसप्तध्वजाः सप्तप्रदीपाः सप्तस्वस्तिकाः मत्स्यमांससुराः अन्नभक्तञ्च दक्षिणस्यां दिशि मध्याह्ने चतुष्पथे वलिर्दातव्यः शिवनिर्म्माल्यगुग्गुलुसर्षपनिम्बपत्रमेषशृङ्गैर्दिनत्रयं धूपयेत् । ॐ नारायणाय नमः हन हन मुञ्च मुञ्च हुं फट् चायस्व स्वाहा । चतुर्थे दिवसे ब्राह्मणं भोजयेत् ततः सम्पद्यते शुभम् ।" इति चक्रपाणिदत्तः ॥

पूतनारिः, पुं, (पूतनाया अरिः शत्रुः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥

पूतनासूदनः, पुं, (पूतनां सूदयति सूदितवानिति वा । सूद+ल्युः ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥

पूतनाहा, [न्] पुं, (पूतनां हन्तीति । हन+क्विप् ।) श्रीकृष्णः । इति हेमचन्द्रः ॥

पूतफलः, पुं, (पूतानि पवित्राणि फलान्यस्य ।) पनसः । इति राजनिर्घण्टः ॥ (पनसशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

पूता, स्त्री, (पूत+टाप् ।) दूर्व्वा । इति राजनिर्घण्टः ॥

पूतात्मा, [न्] पुं, (पूतः पवित्र आत्मा स्वभावः ।) पवित्रस्वभावः । (पूत आत्मा स्वरूपं यस्य विष्णुः । यथा, महाभारते । १३ । १४६ । १५ ।

"पूतात्मा परमात्मा च मुक्तानां परमा गतिः ॥")

शुद्धदेहे, त्रि । यथा,—

"शाम्बोऽपि स्तवराजेन स्तुत्वा सप्ताश्ववाहनम् ।
पूतात्मा नीरुजः श्रीमांस्तस्माद्रोगाद्विमुक्तवान् ॥"
इति शाम्बपुराणे सूर्य्यस्तवः ॥

पूति, क्ली, (पुनातीति । पू+कर्त्तरि क्तिच् ।) रोहिषतृणम् । इति राजनिर्घण्टः ॥

पूतिः, स्त्री, (पू+भावे क्तिन् ।) पवित्रता । दुर्गन्धः । इत्यमरटीकायां रायमुकुटः ॥ (यथा, गारुड़े १८० अध्याये ।

"मेषमूत्रसैन्धवाभ्यां कर्णयोर्भरणात् शिव ।
कर्णयोः पूतिनाशः स्यात् कृमिस्रावो विनश्यति ॥")

खट्टाशसुष्कः । खाटाशी इति भाषा । तस्यानुलेपनगुणः । परमालक्ष्मीरक्षोज्वरनाशित्वम् । इति राजवल्लभः ॥ (अस्या विशोधनं यथा,—

"यथालाभमपामार्गस्नुह्यादिक्षारलेपितम् ।
वासस्वेदेन संस्विद्य पूतिं निर्लोमतां नयेत् ॥
दोलापाकं पचेत् पश्चात् पञ्चपल्लववारिणा ।
खलः साधुमिवोत्पीड्य ततो निर्गन्धतां नयेत् ॥